॥श्री गणेशायनमः॥ अथ आतुरयतीनां नित्यविधिः॥ तत्रबोधायनः॥ शयनादुत्थितो यस्तु कीर्तयन्मधुसूदनं॥ कीर्तनात्तस्य पापा निशमायांत्यशेषतः॥१॥ प्रातर्मध्यंदिने काले स्नानं विधिवदाचरेत्॥ शौचमाचमनंचैव संध्याध्यानमतंद्रितः॥ श्रीगुरुं नत्वा॥ शौचादिकं विहाय॥ जलाशयं गत्वा॥ अथ स्नानविधिः॥ प्रणवेनाचम्य॥ केशवायनमः॥ २४॥ प्रणवेन

साक्षी केवलं कूटस्थचिन्मात्रस्वरूपो नाज्ञान
तत्कार्यं च किंतु नित्यशुद्धबुद्धमुक्तसत्यस्वभा
वः परमानंदानंताद्वयं प्रत्यक्भूतं परं ब्रह्मै
वाहमस्मि॥ अहमेव परं ब्रह्मेत्यभेदेनावस्था
नं समाधिः॥ एवं महावाक्यार्थः॥ प्रज्ञानं ब्र
ह्म अहं ब्रह्मास्मि तत्त्वमसि अयमात्मा ब्रह्म वि
ज्ञानमानंदं ब्रह्म सत्यज्ञानमनंतं ब्रह्म॥ एक

स्याज्ञानं साभासमव्याकृतमित्युच्यते॥ त
च्च न सत्तं नासत् नापि सदसत् न सन्नासन्नापि
सदसन्न भिन्नं नाभिन्नं नापि भिन्नाभिन्नं कुत
श्चित् न निरवयवं न सावयवं नोभयं किंतु
केवलं ब्रह्मात्मैकत्वज्ञानोपनोद्यं सर्वप्रकार
ज्ञानोपसंहारो बुद्धेः कारणात्मनावस्थानं सु
षुप्तिः॥ तदुभयाभिमान्यात्मा प्राज्ञः॥ एतत्त्र
यं मकारः॥ अकार उकारः उकार मकारः म
[illegible] कारः॥ ॐकारोहमेव॥ अहमात्मा

प्राणानायम्य ॥ प्रणवना त्रिवार स्ना... ॥ ...

उन्मज्ज ॥ द्वादशप्रणवेनाघमर्षणं ॥ ततो ध्येऽ

इत्वा ॥ ॐ आत्मैवेदं सर्वं ॥ ॐ ब्रह्मैवेदं सर्वं

० ॥ ॐ सर्वं खल्विदं ब्रह्म ०३ ॥ ॐ परोरजसे सौ

वदों इदमर्घ्यं समर्पयामि ॥ ३ ॥ आचम्य ॥ जल

तर्पणं द्वादशवारं ॥ इति स्नानविधिः ॥ ततो प्रण

वेन कमंडले उदकं गृहीत्वा ॥ प्रणवेन कौपीना

दिवस्त्रधारणं ॥ ऊर्ध्वतंतुभवे कृत्वा अधो तंतुः

सदाशिवः ॥ विष्णुर्वेदं तं संतत्वे कौपीनं धार

याम्यहं ॥ ततो भस्मधारणं ॥ तत्र मंत्रः ॥ अग्निरि

तिभस्म जलमितिभस्म स्थलमिति भस्म वायुरि

रिभस्म व्योमेतिभस्म मनः सहितानि इंद्रिया

णि भस्मानि सर्वं हवा इदं भस्म ॥ आचम्य ॥

ॐ जगदंकुरकंदाय सच्चिदानंदमूर्त्तये ॥ गलि

ताखिलभेदाय नमः शांताय विष्णवे ॥ १ ॥ अवि ऽ

कारायशुद्धाय निसाय परमात्मने ॥ नमः सदेक

... निमग्नाते ॥ २ ॥ यद्बोधादिदं

समाधिविधिं व्याख्यास्यामः॥ ॐ सच्छब्दवाच्यम
विद्याशबलं ब्रह्म॥ ब्रह्मणोव्यक्तं॥ अव्यक्तान्महत्
॥ महतोहंकारः॥ अहंकारात्पंचतन्मात्राणि॥ पंचत
न्मात्रेभ्यः पंचमहाभूतानि॥ पंचमहाभूतेभ्योऽखि
लं जगत्॥ पंचमहाभूतानामेकैकं द्विधा समं विभ
ज्य॥ पुनरेकैकमर्धभागं चतुर्धा विभज्य॥ स्वस्वार्ध
भागं विहाय॥ इतरेषु भागेषु पंचधा पंचीकृतेषु पंची
करणं भवति॥ अध्यारोपापवादाभ्यां निःप्रपंचं
प्रपंच्यते॥ पंचीकृतपंचमहाभूतानि तत्कार्यं च
सर्वं विराडित्युच्यते॥ एतत्स्थूलशरीरमात्मनः॥ इं
द्रियैरर्थोपलब्धिर्जागरितं तदुभयाभिमान्या
त्मा विश्वः॥ एतत्त्रयं अकारः॥ अपंचीकृतपंच
महाभूतानि तत्कार्यं च॥ सप्तदशकं लिंगं भौक्तिकं
इ हिरण्यगर्भ इत्युच्यते॥ एतत्सूक्ष्मशरीरमात्म
नः॥ करणेषूपसंहृतेषु जागरितसंस्कारजः प्र
प्रत्ययः सविषयः स्वप्नः तदुभयाभिमान्यात्मा तै
जसः ते एत्त्रयमुकारः॥ शरीरद्वयकारणमा